© 2017 IJSRST | Volume 3 | Issue 8 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
Themed Section: Science and Technology

# परीक्षिन्नाटकचक्रे कार्यावस्थाः
# (आरम्भः, यत्नः, प्राप्त्याशा, नियताप्तिः, फलागमः)



**सुधा मिश्रा, शोधच्छात्रा**

राष्ट्रिय संस्कृत संस्थान (मा.वि.वि.)

गङ्गानाथ झा परिसर, इलाहाबाद

कार्यरूपार्थप्रकृतेः पञ्चावस्था भवन्ति– आरम्भः, यत्नः, प्राप्त्याशा, नियताप्तिः, फलागमश्च। यथोक्तम् –

**अवस्थाः पञ्चकार्यस्य प्रारब्धस्य फलार्थिभिः ।**
**आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः२ ।।**

एताः पञ्च फलार्थिभिः उद्देश्यसिद्धिं लब्धुमिच्छुभिः प्रारब्धस्य कार्यस्य अवस्था निष्पाद्यनिष्पादकरूपाः ज्ञेया तत्रारम्भयत्नप्राप्त्याशानियताप्तिरूपाश्च तिस्रोऽवस्था निष्पादिकाः, फलागमरूपा तु निष्पाद्या इत्यवगन्तव्या।

१. आरम्भः– मुख्यफलस्य नायकमुख्योद्देश्यस्य सिद्धये निष्पत्तये यत् औत्सुक्यम् उत्कटरागः स आरम्भो भवेत्। यथोक्तम् –

**भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये[१] ।।**
**अत्र नायकश्च नायिकादयश्च इति एकशेषः अवगन्तव्यः।**

कचदेवयानीये नाटके कचप्राप्तिरूपकार्यस्य सिद्धये देववान्याः औत्सुक्यं आरम्भकार्यावस्था। देवयानी कथयति–

**सुधालिप्तेन रागेण कृताऽहं भावरागिणी ।**
**विना सङ्गीतसाहित्यं जीवनं भाति पाशवम् ।।**

दुर्भिक्षा–निवारणार्थं नर्तनशालानाटके दुर्भिक्षारूपकार्यस्य आरम्भः सूचयति कीचकवाक्यम् –

**सर्वदा मां दहत्येव दावाग्निरिव मन्मथः ।**
**सङ्गमाम्भोधरेण त्वं मन्मथाग्निं प्रशामय३।।**
**कीचकस्य सैरन्ध्रीं प्रतिप्रेमनिवेदनमेव दुर्भिक्षा।**

२. प्रयत्नः–फलावाप्तौ नायकस्य नायिकाया वा प्रधानफलप्राप्तिविषये अतित्वरास्थितो व्यापारः पात्रमात्रस्य आग्रहः प्रयत्नो भवेत्। यथोक्तम् –

**प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः१ ।।**

नर्तनशालानाटके कीचकस्य सैरन्ध्रीं प्राप्तुमुद्योगः। सः कथयति – अहं तस्याः सकाशं गत्वा साधनीयं साधयामि –

**शुकीमेनां ग्रहिष्यामि सुदृढं बाहुपञ्जरे ।**
**कीरवाणी दिवारात्रं दद्यान्मे मूर्च्छनादिकम्[2]।।**

अथ च सैरन्ध्रीं प्रति कीचकवाक्यम् –

**कल्याणि त्वं रता दास्ये किमर्थं विपुलं वद।**
**मां भजस्व वरारोहे भुङ्क्ष्व भोगान् रसार्णवे[3]।।**

IJSRST184967 | Received : 01 Dec 2017 | Accepted : 22 Dec 2017 | November-December-2017 [(3)8 : 1842-1844]

३. प्राप्त्याशा–उपायः फलसिद्धेः हेतुसद्भावश्च अपायस्य प्रतिबन्धकस्य – ज्र च ताभ्यां तथोक्ताभ्याम्, प्राप्तिसम्भवः उद्देश्यप्राप्तिसम्भावना प्राप्तेः प्रधानफललाभस्य आशा प्राप्त्याशा भवेत्। यथोक्तम् –

**उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः[4]।**

नर्तनशालानाटके सैरन्ध्रीप्राप्तिरूपदुर्भिक्षायाः प्राप्त्याशा सैरन्ध्र्याः कीचकसमीपे गमनम्। कीचकस्योक्तिः – सैरन्ध्री! यदा त्वं मदीयनिवेशं प्रविष्टाऽसि। नक्तम् एकाकिनी एकान्ते सत्यं त्वं मदीयाऽसि न ते अधिकारः मामवरोद्धुम्। पश्य –

**यामिन्यां सरसां तन्वीम् एकान्ते कोऽपि न त्यजेत् ।**
**अधुना मे वशीभूता नास्ति मोक्षस्तवाङ्गने[5]।।**

४. नियताप्तिः – अपायस्य अन्तरायस्य अभावतो विलुप्तत्वात् निश्चिता प्राप्तिः निर्णीता फलप्राप्तिस्तु नियताप्तिर्भवेत्। यथोक्तम् –

**अपायाभावतो प्राप्तिर्नियताप्तिस्तु निश्चिता[6]।**

यथा नर्तनशालानाटके सुदेष्णा कथयति – अरे मूर्ख! श्रृणु, आगामिनि पर्वणि विविधभक्ष्य–भोज्य–चोष्य–पेयादिकम् अनेकप्रकारसुरां च विधाय सिद्धं कुरु। तत्र तव शयनमन्दिरात् सुरामानेतुम् एनां तवान्तिवंह्व प्रेषयिष्यामि। सम्प्रेषितामेनां तत्र विजने यथाकामं निगृह्य विचर। इति–सुदेष्णा वाक्यं श्रुत्वा चिन्तयति यदेतेन निश्चितरूपेण सैरन्ध्रीप्राप्तिरूपदुर्भिक्षा पूर्णा भविष्यति। अत एव सः कथयतिकृअग्रजे! त्वं मे प्रियकारिणी। भवत्यादेशानुसारम् अहं सर्वं सन्नाहं कारयेयम्। अहो स्त्रीणां बुद्धिः समयानुसारिणी। यतः–

**आगते सर्ज्टे काले कर्तव्यं क्षिप्रयुक्तिभिः।**
**स्त्रियः शान्तं विधास्यन्ति स्त्रीबुद्धिस्सर्वतोमुखी[7]।।**

अथवा यदा सैरन्ध्री कथयति – 'अत्र तव वेश्मनि मे भीतिः भवति। भवान् सन्ध्यासमये नर्तनशालां समागच्छतु। सर्वमपि तत्र सुकरम् अतिसुखदं भविष्यति। त्वम् एकाकी भूत्वा समागच्छ। अन्येषां दर्शनेन कामः भीतः भवति इति सैरन्ध्र्याः वाक्यं श्रुत्वा दुर्भिक्षा प्राप्त्याशया कीचकः अट्टहासपूर्ववंह्व कथयति – भवती मा भण। जानाम्यहं सर्वम्। अहम् एकाकी तत्रागमिष्यामि। यथा गन्धर्वाः मां न पश्येयुः। भवती गच्छतु। (सैरन्ध्री लज्जया निवृत्ता भवति) वडिशलग्ना शफरी[8]। (इति अट्टहासं करोति) कीचकः अनुभवति यत् मम दुर्भिक्षा पूर्णा भविष्यतीति।

५. फलागमः – यः समग्रफलोदयः समस्तोद्देश्यफलसिद्धिः। सामग्र्यञ्च मुख्योद्देश्यफलान्तरसाहित्यम्। तदभिधास्यति फलान्तरसहित इति। सा फलयोगः फलागमो नाम अवस्था स्यात्। इयमवस्था पूर्वोक्तचतुरवस्थाभिर्निष्पाद्या। यथोक्तम् –

**सावस्था फलयोगः स्याद्यः समग्रफलोदयः[9]।**

यथा नर्तनशालानाटके नर्तनशालायां गत्वा कीचकः सुसज्जितशयने उपविश्य चिन्तयतिकृहा विपुलजघने सैरन्ध्रि! किमर्थं विलम्बसे। इयं शर्वरी बहुव्रूह्नरा। निर्दया। मां एकाकिनं बाधयति। . . . . . .अहो अतीव वेला यापिता निरर्थका। प्रिये –

**आलिङ्ग्य देहं कुचभारनम्रं**
**विलासलावण्यसरोवरे ते ।**
**तरन् यथेच्छं रसमग्नचित्तः**
**प्रशामयेयं मम मारबाधाम् ।।**

एहि कृशोदरि! मे शयनमन्दिरम्। मया सावंह्व सानन्दं रमस्व। इति विंह्वकर्तव्यतामूढः हस्तपादं प्रसार्य शयने अशेत। तदैव बल्वलः सैरन्ध्रीवेशेण प्रविश्य कीचकशयने उपविशति। कीचवंह्व वामहस्तेन कण्ठं निगृह्य दक्षिणहस्तेन मुष्टिभिः मारयितुम् उद्युक्तः भवति। एवं कीचकस्य दुर्भीक्षारूपफलस्य प्राप्तिः भवति। तस्य दुर्भिक्षा पूर्णा भवति। एवं नर्तनशालानाटके पञ्चावस्थानां विवरणं प्राप्यते। परीक्षतशर्मणः अन्येषु नाटकेष्वपि एवमेव पञ्चावस्थानां प्रयोगः द्रष्टुं शक्यते। स्थानाभावात् समग्ररूपेण न विवेचितम्।

**सन्दर्भ**


1. साहित्यदर्पणे, ६.७०–७१
2. साहित्यदर्पणे, ६.७१
3. कचदेवयानीयम्, पृ. ६
4. नर्तनशाला, पृ. ७
5. साहित्यदर्पणे, ६.७२
6. नर्तनशाला, पृ. ६
7. नर्तनशाला, पृ. ८
8. साहित्यदर्पणे, ६.७१.
9. नर्तनशाला, पृ. १४
10. साहित्यदर्पणे, ६.७३
11. नर्तनशाला, पृ. ११
12. नर्तनशाला, पृ १७
13. साहित्यदर्पणे, ६.७३
14. नर्तनशाला, पृ. १८